# Andhakadhyatam Shiva Ashtottarashata Nama Stotram 4

# अन्धकध्यातं शिवाष्टोत्तरशतनामस्तोत्रम् ४

## Document Information

Text title : Andhakadhyatam Shiva Ashtottarashata Nama Stotram 4

File name : andhakadhyAtaMshivAShTottarashatanAmastotram.itx

Category : shiva, shivapurANa, aShTottarashatanAma, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : shivapurANa | rudrasaMhitA | yuddhakhaNDa | adhyAya 49/5-18||

Latest update : February 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 10, 2025

*sanskritdocuments.org*

# अन्धकध्यातं शिवाष्टोत्तरशतनामस्तोत्रम् ४

ददर्श शूले संशुष्कं ध्यायन्तं परमेश्वरः ।
अन्धकं धैर्यसम्पन्नं दानवेशं तपस्विनम् ॥ ४॥

अन्धक उवाच ।
ॐ महादेवो विरूपाक्षः चन्द्रार्द्धकृतशेखरः ।
अमृतः शाश्वतः स्थाणुः नीलकण्ठः पिनाकधृक् ॥ ५॥

वृषभाक्षो महाज्ञेयः पुरुषः सर्वकामदः ।
कामारिः कामदहनः कामरूपः कपर्दधृक् ॥ ६॥

विरूपो गिरिशो भीमः स्रग्वी च रक्तवासधृक् ।
योगी च कालदहनः कपाली त्रिपुरान्तकः ॥ ७॥

गूढव्रतो गुप्तमन्त्रः गम्भीरो भावगोचरः ।
अणिमादिगुणाधारस्त्रैलोक्यैश्वर्यदायकः ॥ ८॥

वीरो वीरहणो घोरः विरूपो मांसलः पटुः ।
महामांसाद उन्मत्तः भैरवो वै महेश्वरः ॥ ९॥

त्रैलोक्यद्रावणो लुब्धः लुब्धको यज्ञसूदनः ।
कृत्तिकानां सुतैर्युक्त उन्मत्तः कृत्तिवासधृक् ॥ १०॥

गजकृत्तिपरीधानः क्षुब्धो भुजगभूषणः ।
दत्तालम्बश्च वेतालः घोरश्शाकिनिपूजितः ॥ ११॥

अघोरो घोरदैत्यघ्नः घोरघोषो वनस्पतिः ।
भस्माङ्गो जटिलश्शुद्धो भेरुण्डशतसेवितः ॥ १२॥

भूतेश्वरो भूतनाथः पञ्चभूताश्रितः खगः ।
क्रोधितो निष्ठुरश्चण्डः चण्डीशश्चण्डिकाप्रियः ॥ १३॥

चण्डस्तुङ्गश्च गरुत्मान् नित्यमासवभोजनः ।

लेलिहानो महारौद्रः मृत्युर्मृत्योरगोचरः ॥ १४॥

मृत्योर्मृत्युर्महासेनः श्मशानारण्यवासकृत् ।
रागो विरागो रागान्धः वीतरागशतार्चितः ॥ १५॥

सत्त्वं रजस्तमोधर्ममधर्मं वासवानुजः ।
सत्यं त्वसत्यं सद्रूपमसद्रूपमहेतुकम् ॥ १६ ॥

अर्द्धनारीश्वरो भानुः भानुकोटिशतप्रभः ।
यज्ञो यज्ञपती रुद्र ईशानो वरदः शिवः ॥ १७॥

(१०७)अष्टोत्तरशतं ह्येतन्मूर्तीनां परमात्मनः ।
शिवस्य दानवो ध्यायन्मुक्तस्तस्मान्महाभयात् ॥ १८॥

दिव्येनामृतवर्षेण सोऽभिषिक्तः कपर्दिना ।
तुष्टेन मोचितस्तस्माच्छूलाग्रादवरोपितः ॥ १९॥

इति शिवपुराणे रुद्रसंहितायां युद्धखण्डे एकोनपञ्चाश-
त्तमाध्यायान्तर्गतं अन्धकेन ध्यातं शिवाष्टोत्तरशत-
नामस्तोत्रं समाप्तम् ।

शिवपुराण । रुद्रसंहिता । युद्धखण्ड । अध्याय ४९/५-१८॥

shivapurANa . rudrasaMhitA . yuddhakhaNDa . adhyAya 49/5-18..

Proofread by PSA Easwaran

*Andhakadhyatam Shiva Ashtottarashata Nama Stotram 4*

pdf was typeset on February 10, 2025

Please send corrections to *sanskrit@cheerful.com*